इंडिया टीवी .in
www.indiatv.in

# शनि कवच पाठ

शनि कवच पाठ**: Shani Kavach Stotra Path**

अस्य श्री शनैश्चरकवचस्तोत्रमंत्रस्य कश्यप ऋषिः,

अनुष्टुप् छन्दः, शनैश्चरो देवता, शीं शक्तिः,

शूं कीलकम्, शनैश्चरप्रीत्यर्थं जपे विनियोगः

नीलाम्बरो नीलवपु: किरीटी गृध्रस्थितत्रासकरो धनुष्मान्|

चतुर्भुज: सूर्यसुत: प्रसन्न: सदा मम स्याद्वरद: प्रशान्त:||

श्रृणुध्वमृषय: सर्वे शनिपीडाहरं महंत्|

कवचं शनिराजस्य सौरेरिदमनुत्तमम्||

कवचं देवतावासं वज्रपंजरसंज्ञकम्|

शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम्||

ऊँ श्रीशनैश्चर: पातु भालं मे सूर्यनंदन:|

नेत्रे छायात्मज: पातु कर्णो यमानुज:||

नासां वैवस्वत: पातु मुखं मे भास्कर: सदा|

स्निग्धकण्ठश्च मे कण्ठ भुजौ पातु महाभुज:||

इंडिया टीवी .in
www.indiatv.in

स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रद:।

वक्ष: पातु यमभ्राता कुक्षिं पात्वसितस्थता।।
नाभिं गृहपति: पातु मन्द: पातु कटिं तथा।

ऊरू ममाऽन्तक: पातु यमो जानुयुगं तथा।।
पदौ मन्दगति: पातु सर्वांग पातु पिप्पल:।

अंगोपांगानि सर्वाणि रक्षेन् मे सूर्यनन्दन:।।
इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य य:।

न तस्य जायते पीडा प्रीतो भवन्ति सूर्यज:।।
व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा।

कलत्रस्थो गतोवाऽपि सुप्रीतस्तु सदा शनि:।।
अष्टमस्थे सूर्यसुते व्यये जन्मद्वितीयगे।

कवचं पठते नित्यं न पीडा जायते क्वचित्।।
इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा।

जन्मलग्नस्थितान्दोषान् सर्वान्नाशयते प्रभु:।।